# Shri Ganesha Stuti Durvakrita

# દૂર્વાકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Durvakrita

File name : gaNeshastutiHdUrvAkRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM panchamaH khaNDaH | adhyAyaH 27 | 5.27. 32-63||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# દૂર્વાકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
દૂર્વોવાચ ।
ગણેશાય નમસ્તુભ્યં વિઘ્નરાજાય તે નમઃ ।
ભક્તાનાં વિઘ્નસંહર્ત્રે ત્વભક્તાનાં ભયઙ્કર ॥ ૩૨॥
અનન્તાયાપ્રમેયાય નાનાલીલાધરાય ચ ।
હેરમ્બાય મહેશાનાં નમઃ પૂજ્યાય તે નમઃ ॥ ૩૩॥
સર્વપૂજ્યાય સર્વાદિપૂજ્યાય બ્રહ્મરૂપિણે ।
બ્રહ્માકારાય સર્વેશ બ્રહ્મણસ્પતયે નમઃ ॥ ૩૪॥
અનાકારાય સાકારમૂર્તયે બ્રહ્મરૂપિણે ।
શાન્તિભ્યઃ શાન્તિદાત્રે તે પરેશાય નમો નમઃ ॥ ૩૫॥
લમ્બોદરાય ચૌરેશવાહનાય પરાત્મને ।
ચતુર્ભુજાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ॥ ૩૬॥
જ્યેષ્ઠેભ્યો જ્યેષ્ઠરાજાય જ્યેષ્ઠપદપ્રદાયિને ।
મહોદરાય પૂર્ણાય પૂર્ણાનન્દાય તે નમઃ ॥ ૩૭॥
સ્વાનન્દવાસિને તુભ્યં સિદ્ધિબુદ્ધિમયાય ચ ।
સિદ્ધિબુદ્ધિપતે નાથ ભક્તેશાય નમો નમઃ ॥ ૩૮॥
કિં સ્તૌમિ ત્વાં ગણાધીશ યત્ર વેદા વિસિસ્મિરે ।
અતસ્ત્વાં પ્રણમામ્યેવ તેન તુષ્ટો ભવ પ્રભો ॥ ૩૯॥
એવં સ્તુત્વા ગણેશાનં ભક્તિયુક્તા નનર્ત હ ।
જગાદ ગણરાજસ્તુ દૂર્વાં તાં હર્ષસંયુતઃ ॥ ૪૦॥
શ્રીગણેશ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રમપરાધસહં ભવેત્ ।
માં સ્તૌતિ તસ્ય દૂર્વેऽહમપરાધં સહામ્યહમ્ ॥ ૪૧॥
યં યં ચિન્તયતે કામં તં તં દાસ્યામિ સર્વદા ।
ભુક્તિમુક્તિપ્રદં સ્તોત્રં ભવિષ્યતિ સુસિદ્ધિદમ્ ॥ ૪૨॥

વરં વરય દાસ્યામિ ચિત્તસ્થં ભક્તિતોષિતઃ ।
ક્રોધયુક્તોઽપિ દેવિ ત્વાં મન્ત્રત્યાગકરીં પુનઃ ॥ ૪૩॥
શ્રુત્વા તં ભયસંયુક્તા જગાદ વાક્યમુત્તમમ્ ।
દૂર્વા લમ્બોદરં પ્રીત્યા સાશ્રુનેત્રા પ્રજાપતે ॥ ૪૪॥
દૂર્વોવાચ ।
વરદોઽસિ યદા નાથ તદા તે ભક્તિમુત્તમામ્ ।
દૃઢાં દેહિ ગણાધ્યક્ષ તયા સર્વં શુભં ભવેત્ ॥ ૪૫॥
અન્યચ્ચ મદસંયુક્તાં જગદમ્બાં ગજાનન ।
સ્પર્ધેહં તત્કલાંશા વૈ તયા શપ્તાઽતિદારુણમ્ ॥ ૪૬॥
તૃણરૂપા ભવિષ્યામિ પતિષ્યામિ ધરાતલે ।
તદર્થં ત્વામનુપ્રાપ્તા રક્ષ માં મહતો ભયાત્ ॥ ૪૭॥
શ્રીગજાનન ઉવાચ ।
મા કુરુષ્વ વૃથા ચિન્તાં દૂર્વે મે શરણાગતે ।
સર્વં શુભં કરિષ્યામિ ભવિષ્યામિ નિયન્ત્રિતઃ ॥ ૪૮॥
અંશેન તૃણરૂપા ત્વં ભવિષ્યસિ મહીતલે ।
દેવી દેહધરા સ્વર્ગે ચરિષ્યસિ યથા પુરા ॥ ૪૯॥
પૃથિવ્યાં તૃણરૂપા ત્વમમૃતરૂપધારિકા ।
શતમૂલા પ્રકાણ્ડાદ્ વૈ પ્રરોહા ચ શતાઙ્કુરા ॥ ૫૦॥
સર્વમાન્યા સર્વપૂજ્યા દેવાદીનાં સદા પ્રિયા ।
ભવિષ્યસિ ન સન્દેહો મદ્વરાદન્નનાયિકે ॥ ૫૧॥
મહામઙ્ગલદા પ્રોક્તા મમ પ્રીતિવિવર્ધિની ।
ભવિષ્યસિ તુ લોકાનાં શુભમઙ્ગલદાયિકા ॥ ૫૨॥
ત્વત્પત્રેણ નરા ભૂમાવર્ચયિષ્યન્તિ દેવપાન્ ।
ન ત્વત્સમં તુ પત્રેષુ પુણ્યદં પ્રભવિષ્યતિ ॥ ૫૩॥
શક્તેશ્ચૈવાવતારા યે લક્ષ્મીલલિતિકાદયઃ ।
તાસાં પ્રિયા વિશેષેણ ભવિષ્યસિ મહાશુભે ॥ ૫૪॥
શાપિતા ગિરિપુત્ર્યા ત્વં સા ત્વાં નૈવ સ્પૃશેત્ કદા ।
અન્યત્ર માન્યભાવેન ભવિષ્યસિ ન સંશયઃ ॥ ૫૫॥
મદીયા ભક્તિરત્યન્તં દૃઢા તે પ્રભવિષ્યતિ ।
મચ્ચિત્તા મદ્ગતપ્રાણા ભવિષ્યસિ ચ દૂર્વિકે ॥ ૫૬॥
મદીયામિચ્છસિ ભક્તિમતસ્તેઽહં સુહર્ષિતઃ ।
કરિષ્યામિ સદા દેવિ મમ પ્રીતિવિવર્ધિનીમ્ ॥ ૫૭॥

દૂર્વાપત્રં વિના દેવિ પૂજયિષ્યન્તિ માં નરાઃ ।
તેષાં નૈવ ફલં તસ્યાઃ પૂજાયાઃ પ્રભવિષ્યતિ ॥ ૫૮॥
દૂર્વાસમં ન મે કિઞ્ચિત્ પૂજાયાં સુપ્રિયં ભવેત્ ।
વિના દૂર્વાં નિરાહારી ભવિષ્યામિ નિરન્તરમ્ ॥ ૫૯॥
ત્યક્ત્વા દૂર્વાદલં યે વૈ પૂજયિષ્યન્તિ માનવાઃ ।
શત્રવસ્તે મતા નિત્યં નરકેષુ પચન્તુ તે ॥ ૬૦॥
યેનાર્પિતં ચ પૂજાયાં દૂર્વાપત્રં મહામતે ।
તેનાપારમયં સર્વં દત્તં મહ્યં વિશેષતઃ ॥ ૬૧॥
દૂર્વાપત્રેણ સન્તુષ્ટો દાસ્યામિ સકલં ચ મે ।
ઐશ્વર્યં તદપિ પ્રાજ્ઞે ન સમં દૂર્વયા ભવેત્ ॥ ૬૨॥
યે મદ્ભક્તાશ્ચ તૈર્નિત્યં કર્તવ્યં દૂર્વયા યુતમ્ ।
પૂજનં મે સદા દેવિ જિતોઽહં નાત્ર સંશયઃ ॥ ૬૩॥
એવમુક્ત્વા ગણેશાનોઽતર્દધે ચ પ્રજાપતે ।

ઇતિ દૂર્વાકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પઞ્ચમઃ ખણ્ડઃ । અધ્યાયઃ ૨૭ । ૫.૨૭। ૩૨-૬૩॥

- .. mudgalapurANaM pa nchamaH khaNDaH . adhyAyaH 27 . 5.27. 32-63..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Durvakrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*